Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 2 | ISSN : 2581- 6306

# वास्तौ गर्भविधानम्



अव्यक्त रैणा
शोधच्छात्रः,
वास्तुशास्त्रविभागः,
श्री ला. ब. शा. रा. सं. विश्वविद्यालयः,
नई दिल्ली।

**Article Info**
Volume 4, Issue 2
Page Number : 109-118

**Publication Issue :**
March-April-2021

**Article History**
Accepted : 01 April 2021
Published : 10 April 2021

**सारांश** – शिलान्यासदतिरिक्तं गर्भविन्यासस्य मयोक्तपरम्परा तत्कालीनसंस्कृतेर्विशिष्टता विद्यते । यस्यां पृथिव्यां जनः सम्पदामर्जयति, तस्याः कुक्षौ रत्न-धात्वादितत्त्वानि समर्प्य कार्यराम्भस्य विचारः गर्भविन्यासे क्रियते । गर्भविन्यासस्य प्रयोजनंसन्दर्भे ग्रन्थकारो वदति यद् देवालय-द्विजातिहर्म्यगृहेभ्यश्च गर्भविन्यासविधिं (नींवभरणादिविचारः) वक्ष्याम्यहम् ।[1]
समस्तद्रव्यैः सह कृतः गर्भविन्यासः सर्वदा सम्पदाशाली भवति। यदि द्रव्यादिभिर्हीनः गर्भविन्यासः क्रियते तदा गृहस्थाय सर्वविपत्तिकारणभूतो भवति । तस्मातद् गृहशिल्प्याचार्याद्यः सम्यग्रूपेण गर्भविन्यासस्य कार्यं सम्पादयेयुः ।[2]

**मुख्यशब्दः–** ंगर्भविन्यासः, गर्भः, जनः, शयनगारः, प्रासादः, अर्थाः वास्तुः, गर्भविधानम् ।

गृ धातोः भन् प्रत्ययेन पुँल्लिङ्गे 'गर्भः' इति पदं निष्पद्यते । यस्यानेके अर्थाः विद्यन्ते। यथा – गर्भाशयः, गर्भाधानम्, गर्भकालः, अण्डशावकः, आभ्यन्तरम्, मध्यभागः, छिद्रम्, अग्निः, आहारः, गर्भाङ्कः इत्यादयः । वास्तुशास्त्रे गर्भपदं सामान्यतः गर्भमण्डपार्थे भवति, यस्यार्थाः सन्ति – शयनगारः, प्रासादः, भवनम्, प्रसूतिकागृहः इत्यादयः ।[3] वास्तुशास्त्रे गर्भस्य विधानं विस्तरेण प्रतिपादितमस्ति। अत्र 'गर्भविधानम्', 'गर्भविन्यासः' वा अनयोर्द्वयोः पदयोरर्थस्तु समान एव ।

**गर्भविधानस्य कृते आवश्यकखातकर्म तत्र प्रपूरणीयवस्तूनि -** वास्तौ गर्भविन्यासस्य कृते आवश्यकमस्ति यत् तत्र भवनस्य उच्चताऽनुरूपं गर्त्तनिर्माणं कर्त्तव्यम्। गर्त्तस्याकारः समचतस्रः स्यात्। गर्तम् ईष्टिकापाषाणादिभिः समं चतुस्रञ्च कुर्यात् । तदन्तरं तं गर्त्तं जलेन पूरयित्वा सर्वविधमृत्तिकाभिः तं सम्पूरयेत्।

तत्र मयमतानुसारेण नद्यः, तडागाद्यगाधजलाशयस्य, सस्यक्षेत्रस्य, पर्वतस्य वल्मीकस्य, कर्कटानां निवासस्थलस्य, हलस्य निवेशस्थलस्य, समुद्रतटस्य गोश्रृङ्गस्य, हस्तिदन्तस्य च मृतिकाभिः गर्तस्य मूलं प्रपूरणीयम्। एतासां मृदानां प्रयोगः गर्त्ते स्थापनाय भवति ।[4] राज्याभिषेककालेऽपि निम्नमृदानामुल्लेखो वर्त्तते । यथोक्तम् –

**पर्वताग्रमृदा तावन्मूर्द्धानं शोधयेन्नृपः ।**
**वल्मीकाग्रमृदाकर्णौ वदनं केशवालयात् ॥**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**इन्द्रालय मृदा ग्रीवां हृदयं च नृपाजिरात् ।**

**करिदन्तोद्धृतमृदा दक्षिणं तु तथा भुजम् ॥**[5]

मृदापूर्त्यनन्तरं तस्मिन् गर्त्ते मध्ये पद्मकन्द (रक्तकमूलस्यमूलं), पूर्वदिशि उत्पलकन्द (नीलकमलस्यमूलम्) दक्षिणदिशि कुमुदम् (श्वेतकमलस्यकन्दम्), पश्चिमदिशि सौगन्धिकम्, उत्तरदिशि च काकलोहं नीललोहं वा निक्षिपेत्। सुप्रभेदागमे उत्पल-पद्म-नीललोहितकुमुदादीनां मूलादेर्न्यासः पूर्वदिशि करणाय निर्देशः प्राप्यते। विवरणमिदं मानसारेऽपि तुलनीयं विद्यते।[6] ततः तस्मिन् एव गर्त्ते अष्टविधानां धान्यानामपि न्यासः कर्त्तव्यः। तत्र ईशानादारभ्य क्रमशः प्रदक्षिणक्रमेण शालिधान्यं , ब्रीहिधान्यं, कोद्रवं मुद्गं माषं, कङ्कुं , कुलत्थं तिलं च प्रक्षिपेत्। तर्हि तस्योपरि ताम्रमयं मञ्जूषं संस्थापयेत् ताम्रमञ्जूषायाः प्रमाणविषये तत्र कथितमस्ति यत्-

**तस्योपरि निधातव्यं मञ्जूषं ताम्रनिर्मितम्।**

**त्रिचतुर्मात्रविस्ताराद् द्विद्वयङ्गुलविवर्धनात् ।**

**पञ्चषड्विंशमात्रान्तं मानं द्वादश भाजने ।**

**समोच्चं वाऽष्टपञ्चभागोनं वा तदुच्छ्रयम्॥।**[7]

प्रकारान्तरेण गर्भविन्यासाय ताम्रमञ्जूषायाः दीर्घता स्तम्भस्य निर्धारितविधानपेक्षया गृहीतोच्चमानस्य 1/3 अंशयुक्तं स्थापयेत्। एतदतिरिक्तं स्तम्भस्य विष्कम्भकस्य समतुल्यं दैर्घ्यं स्यात्। अस्याः मञ्जुषाया उच्चता दैर्घ्यसदृशमेव भवेत् ।[8] मञ्जूषाया आकारविधानस्य त्रयो वर्गाः भवितुमर्हन्ति -

1. त्रिवर्गमण्डपाकारमञ्जूषा
2. वृत्ताकारमञ्जूषा
3. चतुरस्राकारमञ्जूषा चेति ।

मञ्जूषायां पञ्चविंशति कोष्ठकानि अथवा नव कोष्ठकानि स्युः ।[9]

तत्र फेलायाः(मञ्जूषायाः) यदुच्छ्रायमानमस्ति तस्यार्धस्य भागत्रयं विधाय एकभागतुल्यं कोष्ठकस्योच्छ्रायो भवेत्। तस्याः भित्ते घनतां स्थौल्यं वा यवद्वयस्य यवत्रयस्य यवचतुष्टयास्य वा कार्यम् । तत्रोपपीठवास्तुविन्यासे पञ्चविंशति देवाः स्थाप्याः।।

**गर्भस्थापनस्य विधिः** - कस्मिन्नपि शुभसम्मतकाले उक्तमञ्जुषायाः स्थापनार्थं भूतलस्य गर्त्तं सर्वविधगन्धैः पवित्रं कुर्यात्, कुलदेवाय पुष्पाणि समर्प्य, दीपप्रज्वालनञ्च कुर्यात् । एतत्पूर्वमत्र गोमय-गोमूत्र-दधि-दुग्ध-घृतनिर्मितैः पञ्चगव्यैः स्थानमिदं पवित्रं कुर्यात् । पवित्रीकरणादनन्तरं क्षेत्रं शुद्धसूत्रेणावेष्टितं कर्त्तव्यम् ।[10] तदनन्तरं तत्र स्थण्डिले चण्डितपदस्य (7 ×7 पदानि) रचनां अथवा मण्डूक पदस्य (8×8 पदानि) कुर्यात्, तद्विन्यासानुसारञ्च श्वेततण्डुलं (अक्षतं) निक्षेप्य ब्रह्मादीनां देवानामावाहनं कुर्यात् ।[11]

स्थपतेः इदं कर्त्तव्यमस्ति यदावाहितदेवैः सह भुवनपतेर्भगवतो महेश्वरस्य आराधनां कुर्यात्। गन्धपुष्पादिभिः सम्पूज्य प्रणवस्य जपं कुर्यात्। अस्मिन्नेवावसरे तत्र कलशं स्थापयेत्। कलशमिदं वस्त्रादिभिर्विभूषितं स्यात् ।[12]

**कलशलक्षणम्** - कलशः सुगन्धितद्रव्यैर्युक्तः पवित्रजलेन पूरितश्च स्यात्। कलशस्य गन्धपुष्पादिभिः पूजनं कुर्यात्। तस्योपरि किमपि कलङ्कं न स्यात्, न च छिद्रं भवेत्। तदन्तरं 5-5 कलशान् एकस्यां पङ्क्तौ संस्थापयेत् ।[13]

उक्तसज्जाऽनन्तरं गर्भविन्यासस्थले निर्मित्तस्य स्थण्डिलस्य निर्दिष्टमण्डले ईशादिक्रमेण विभिन्नदेवानां सुवासितगन्धैः रचनां कुर्यात्। गन्धपुष्पादिभिः सह यथाविधि बलिं दातव्यम्।[14] तत्पश्चात् उक्तपात्रं श्वेतपात्रेणाऽऽवृत्तं कुर्यात्। तदनन्तरं तस्य उपरि कुशास्तरणं करणीयम्।

**न्यासयोग्यवस्तुनि (धातुविन्यासः)** - ततः अपरदिने मञ्जूषायां पूर्वोक्तनिर्दिष्टवस्तूनां निवेशनं कुर्यात्। स्थपतिः ईशानकोणात् प्रदक्षिणक्रमानुसारं स्वर्णेन शालीद्रव्यस्य, रजतेन ब्रीहेः, ताम्रेण कुलत्थस्य,त्रपुणा कङ्कोः सीसेन माषस्य, अयसा मुद्गस्य , अयसा कोद्रवस्य वैकन्तेन तिलस्य च निर्णाणं कृत्वा पात्रे न्यासं कुर्यात् ।[15]

**जातिहिङ्गुलादिद्रव्यविन्यासः** - तदुपरान्तं विद्वन्मतानुसारं जयन्तपदे जातिहिङ्गुल्यस्य, भृशपदे हरितालस्य, वितथपदे मनःशिलायाः, भृङ्गराजपदे माक्षिकस्य, सुग्रीवपदे राजावर्त्तस्य, शोषपदे गैरिकस्य, मुख्यपदे अञ्जनस्य, अदितिपदे च दरदखनिजस्य न्यासं कुर्यात् ।[16]

**रत्नादिविन्यासः** - एवं मध्यतः पूर्वदिगभिमुखीं प्रदक्षिणक्रमेण मध्ये पद्मरागस्य, मरीचिपदे विद्रुमस्य (प्रवालस्य), सविन्द्रपदे पुष्परागस्य, विवस्वतपदे वैदूर्यस्य, इन्द्रजयपदे वज्रस्य, मित्रपदे इन्द्रनीलस्य, रुद्रराजपदे महानीलस्य, महीधरपदे मरकतस्य, आपवत्सपदे च मुक्तायाः क्रमानुसारं न्यासं कुर्यात् ।[17]

**औषधिसम्भारविन्यासः** - उक्तमञ्जूषायां ईशादिक्रमेण औषधीनां न्यासः कर्त्तव्यः। ईशानकोणे विष्णुक्रान्तायाः (तुलसीपत्रस्य), पूर्वदिशि त्रिशूल्याः, आग्नेये श्रियः, दक्षिणदिशि सहजनस्य, नैर्ऋत्ये दूर्वायाः, पश्चिमे भृङ्गकस्य (भृङ्गराजस्य), उत्तरदिशि अपामार्गस्य, मध्ये च एकपत्रीयपङ्कजस्य न्यासं कुर्यात् ।[18]

**गन्धादिविन्यासः** - औषधिविन्यासानन्तरं जयन्तपदेन प्रदक्षिणक्रमेण चन्दन–अगरु–कर्पूर–लवङ्ग–ईलायची–लालताफल–तक्कोल–इनासंज्ञकानां अष्टगन्धयुक्तानां द्रव्याणां न्यासः कर्त्तव्यः ।[19]

**स्वस्तिकविन्यासः** - अन्ते मञ्जुषायां पूर्वादिचतुर्दिक्षुः स्वर्णलौहताम्ररजतानां स्वस्तिकानां न्यासं कुर्यात् । एतद्विन्यासः सामान्यतः सर्वेषां देवानां मन्दिरे गर्भार्थं निगदितमस्ति। अनन्तरं देशविशेषानुसारेण गर्भविन्यासे कानिचन विशेषवस्तून्यपि संस्थापनीयानि ।

**शिवालयार्थं गर्भविन्यासः** - शिवालयार्थं गर्भविन्यासे मञ्जुषया सह स्वर्णकपाल–शूल–खट्वाङ्ग–परशु–वृषभ–पिनाक–हरिण–पाशानामष्टवस्तूनां पूर्वादिदिक्क्रमेण न्यासं कर्त्तव्यम्।

शिवालयगर्भविन्यासार्थमष्टानां माङ्लिकचिह्नानामपि न्यासो भवति । तानि अष्टविधानि मङ्गलचिह्नानि सन्ति– दर्पण–पूर्णकुम्भ–वृषभ–चामरयुग्म–श्रीवत्स–स्वस्तिक–शङ्ख–दीपकाः। एतानि महादेवस्याष्टमङ्गलानि उच्यन्ते । स्थापकस्याज्ञानुसारं शिष्यः स्थपतिंश्च एतेषामष्टानां माङ्गलिकचिह्नानां क्रमशो निवेशं कुर्यात् ।[20]

अनेन सहैव उक्तशुभ्रपात्रं पिहितं कृत्त्वा स्थापयेत्, अथ च गन्धादिद्रव्याणि अर्पयित्वा पवित्रकलशानां जलेन स्नानं कारयेत् ।[21]

**स्थपतिस्थापकयोः पञ्चाभरणम्** - अस्मिन् अवसरे पाठपारायणे प्रवीणविप्राः कल्याणकारीं जयघोषं कुर्युः । तत्रैव शङ्खभेर्यादिवाद्ययन्त्रैः स्थपतिस्थापकाभ्यां स्वर्णनिर्मितैः पञ्चालङ्कारैः सज्जा कुर्यात् । तानि पञ्चालङ्काराणि सन्ति पुष्पम्, कुण्डलम्,हारम्,कटकम्,अङ्गुलीयकञ्चेति ।

अनेन सहैव स्वर्णस्य यज्ञोपवीतं, नवीनमुत्तरीयञ्च धारयेत् । देहे श्वेतगन्धस्यानुलेपनं कुर्यात् । शीर्षे श्वेतपुष्पं धारयित्वा चित्तं निर्मलं कुर्यात् ।[22]

**ध्याननिर्देशः** - पवित्रचित्तेन तस्याः धरायाः ध्यानं कर्त्तव्यं, या समस्तदिक्पालैः समन्विता विद्यते, सागर–गिरिपर्वतादीन् धारयति अनन्तस्य शीर्षे च स्थिरा विद्यते । अस्मिन्नेव क्रमे सृष्टेः स्थित्युत्पत्तिसंहाराणां मुख्याधारस्य भुवनाधिपतेः शिवस्य **'ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्' इति** मन्त्रजपं कुर्यात् ।[23]

**देवालयेषु गर्भस्थानस्य निर्देशः** - ब्रह्मादीनां देवानां प्रासादप्रसङ्गे इदं ज्ञातव्यमस्ति यत् तेषां मुख्यद्वारस्य दक्षिणभागे अथवा

स्तम्भमूले यथायोग्यं गर्भविन्यासं कुर्यात् ।[24]

एतदतिरिक्तं होमस्तम्भस्य (प्रतिस्तम्भं) स्थाने अथवा वेदिकास्थलस्य निम्नस्थानेऽपि गर्भविन्यासं कर्त्तुं शक्यते । एतदर्थं निश्चितमापनमपेक्षितमस्ति । यदि होमस्तम्भस्य उच्चता वेदिकायाः पादुकायाः वा अधिका न्यूना वा भवेत् चेत् स्तम्भोऽयं विनाशदायको भवति ।[25]

**प्रतिमाफलकाय निर्देशः** - स्थापनादनन्तरं मञ्जूषायां सारवृक्षस्य अथवा पाषाणेन प्रतिमाफलकस्य निर्माणं कारितव्यम् । इदं निर्माणं ताम्रपत्राद् द्विगुणात्मकं भवेत् । एवं एतादृशे स्थाने देवस्वरूपं स्थापयेत् ।[26]

उक्तफलकोपरि एकस्य स्तम्भस्य स्थापनां कुर्यात् । स्थापनेयं चतुरिष्टिकाधारिता स्यात् । स्थापनां रत्नौषधियुक्तंवस्त्रपुष्पादिभिः सुशोभितं कर्त्तव्यम् ।[27]

**वैष्णवायतनेभ्यः गर्भविन्यासः -**

वैष्णवायतनाय गर्भविन्यासे भवनस्य मध्ये स्वर्णचक्रं निवेशयेत् । एवं स्वर्णस्यैव शङ्ख–धनुष–दण्ड–नन्दकसञ्ज्ञकखड्गादीनां न्यासः कर्त्तव्यः ।[28]

तत्र धनुः शङ्खौ वामभागे, खड्ग–दण्डौ च दक्षिणभागे स्थापयेत् । विष्णुवाहनं गरुडमपि स्वर्णनिर्मितामायुधानां समक्षे स्थापयेत् ।[29]

**ब्रह्मायतनाय गर्भविन्यासनिर्देशः** - ब्रह्मायतनाय स्वर्णनिर्मित्तानां यज्ञोपवीत–ओङ्कार–स्वस्तिकाग्नीनां निर्माणं कारयेत् । अपि च तत्र ताम्रनिर्मितानि पद्म–कमण्डलु–दर्भ अक्षसूत्राणि स्थापयेत् । ब्रह्माविराजनस्थाने अर्थात् मध्ये पङ्कजं निवेशयेत् ।[30]

उक्तपङ्कजमध्ये ओङ्कारं (ॐ) स्थापयेत्, एनं स्थानञ्च यज्ञोपवीतेनावेष्टितं कुर्यात् । चतुर्दिक्षु स्वस्तिकम्, वामभागे च कमण्डलुं स्थापयेत् । अस्य वामभागे कुशां अक्षमालां च स्थापयेत्, समक्षे च अग्निकुण्डं स्थापयेत् । तदुपरान्तं ब्रह्मायतने ब्रह्मस्थाने एव गर्भविन्यासः कर्त्तव्यः ।[31]

**षण्मुखायतने गर्भविन्यासनिर्देशः** –कार्तिकेयप्रासादाय स्वर्णनिर्मित्तानां स्वस्तिकाऽक्षमाला–शक्त्यायुध–चक्र–कुक्कुट–मयूरवाहनादीनां ग्रहणं कर्त्तव्यम् । एतेषु धातुनिर्मित्तशक्तिं खड्गं च मध्ये निवेशयेत् ।[32]

तदनन्तरं वामभागे कुक्कुटस्य दक्षिणे मयूरस्य अनयोः समक्षे च अक्षसूत्रस्य न्यासः कर्त्तव्यः ।

**सवितृ-इन्द्रमन्दिरागर्भविधानम्** - सावित्रे प्रासादाय गर्भविन्यासे पङ्कजाऽङ्कुश–पाश–सिंहादीनां पूर्वादिक्रमेण न्यासः कर्त्तव्यः। एवं वज्रिणः प्रासादाय वज्र–नन्दकखड्ग–चक्र–चामरादीनां उक्तक्रमेण न्यासविधानं कथितम्[33]।

**अग्नियमसद्माभ्यां गर्भविधानम्** - अग्नेः प्रासादाय गर्भविधाने स्वर्णमयस्य मेषस्य शक्तेश्च न्यासः कर्त्तव्यः। एवं यममन्दिराय लौहमयस्य महिषस्य स्वर्णपाशस्य च स्थापना कार्या[34]।

**निर्ऋतिवरुणालयाभ्यां गर्भविधानम्** - एव नैर्ऋतेः गर्भविधाने तथा च वरुणप्रासादाय लौहमकर–स्वर्णपाशयोश्च स्थापनं कुर्यात्।[35]

**वायु-चन्द्र-कुवेरकामदेवानामालयेभ्यः गर्भविधानम्** - वायोः प्रासादाय गर्भविधाने स्वर्णमयस्य कृष्णमृगस्य न्यासः करणीयः । तारापतेः चन्द्रस्य सद्मनिमित्तं सुवर्णनिर्मितस्य सर्पस्य स्थापनां कुर्यात्। नरवाहस्य कुबेरस्य देवालये नराकृतिनिवेशस्य विधानमस्ति। । मदनालयस्य (कामदेवस्य) देवालयाय मकरस्य निवेशः कर्त्तव्यः ।[36]

**विघ्नेश-आर्यकप्रासादाय गर्भविन्यासः** - विघ्नेशस्य (गणेशस्य) प्रासादाय गर्भविधाने टङ्क–दन्त–अक्षमालादीनां निवेशः कर्त्तव्यः। आर्यकस्य प्रासादाय गर्भविन्यासे स्वर्णनिर्मित्तम् ओङ्कारं तिर्यग्दण्डं च स्थापयेत् ।[37]

**सुगतदेवस्य (बुद्धस्य मन्दिरे) गर्भविधानम्** - सुगतदेवस्य प्रासादाय स्वर्णाश्वत्थवृक्ष–कमण्डलु–छत्र–सिहादीनां गर्भविधानं

कर्त्तव्यम्। एतेषु स्वर्णाश्वत्थवृक्षः समक्षे भवति, तदुपरि छत्रं स्थापयेत्। वामभागे कुण्डिकां दक्षिणभागे च केसरीसिंहञ्च स्थापयेत्। गर्भे श्रीवत्स- अशोक-सिंहान् च संस्थापयेत् ।[38]

**जिनालयार्थं गर्भविधानम्** - जैनग्रन्थेषु परिकराय येषां लक्षणानां वर्णनं प्राप्यते, ते निवेशयोग्याः सम्भारा उक्ताः । स्वर्णनिर्मितश्रीवत्स-अशोकद्रुम-सिंह-कमण्डलु-अक्षमाला-शिखिपिच्छानां ग्रहणं कर्त्तव्यं गर्भविधानाय । एवं त्रीणि छत्राणि कमण्डलु , स्वर्णनिर्मित्ततालवृन्तञ्च जिनालये गर्भविधानाय विन्यसेत् ।

न्यासकाले अशोकवृक्षः समक्षे स्थापयेत्, तमुपरि च छत्रं स्थापयेत्। मयूरपिच्छं दक्षिणे भागे कुण्डकासहितां अक्षमालाञ्च वामभागे स्थापयेत्। तत्र श्रीरूपं मध्ये स्थापयेत्। तत्रैव च सिंहस्य स्थितिर्भवेत्। अपरभागे कलशतालवृन्तयोः स्थापनां जिनालयनिमित्तं गर्भविधाने कुर्यादिति ।[39]

**दुर्गाप्रासादाय गर्भविधानम् –** दुर्गामन्दिरस्य गर्भविधाने स्वर्णशुकचक्रयोः रजतसिंह-शङ्खयोः निर्माणं कारयेत् । ताम्रधातुना मृगस्य लौहधातुना च नन्दकखड्गस्य निर्माणं कारयेत् ।[40]

**क्षेत्रपालायतनाय गर्भविधानम्** - क्षेत्रपालायतनाय गर्भविधाने स्वर्णनिर्मित्तखट्वाङ्ग-नन्दकखड्गशक्त्यादीनां न्यासः कर्त्तव्यः ।[41]

**लक्ष्मी-सरस्वती-ज्येष्ठानां देवालयेभ्यो गर्भविधानम्** - लक्ष्मीप्रासादस्य गर्भविधानाय पद्मं विन्यसेत्। सरस्वतीप्रासादाय त्रिवर्णकेन ओङ्कारेण (ॐ) गर्भविधानं कर्त्तव्यम् । ज्येष्ठायाः देवालयाय स्वर्णध्वज-ध्वाङ्क्ष-उत्पलादिभिः गर्भविधानं कर्त्तव्यम् ।[42]

**कालिका-सप्तमातृकानां प्रासादाय गर्भविधानम्** - कालिकायाः गृहाय स्वर्णनिर्मित्तकपाल-शूल-घण्टादिभिः गर्भविधानं कर्त्तव्यम्। तत्रैव प्रेतानामपि गर्भविधानं कर्त्तव्यमित्यपि विवेचनमुपलभ्यते। एवं सप्तमातृकानां प्रकोष्ठेभ्यः स्वर्णमयहंस-वृष-मयूर-गरुड-सिंह-गज-प्रेतानां गर्भविधाने स्थापनं करणीयम्।[43]

**पार्वतीमोहिनीदेव्योर्देवालयाभ्यां गर्भविधानम्** - पार्वतीमातुः प्रासादाय दर्पणाऽक्षमालाभ्यां गर्भविधानं कर्त्तव्यम् । मोहिनीदेव्याः प्रासादाय पद्माऽक्षसूत्र-पूर्णकुम्भैर्गर्भविधानं कर्त्तव्यम्।

अत्र स्मरणीयमिदं तथ्यमस्ति यद्येषां देवतानामुल्लेखोऽत्र नाऽभवत्, तासां प्रासादेभ्यः निर्दिष्टचित्र-ध्वजाऽऽयुध-पताकाऽन्यचिह्नैर्गर्भविधानं कर्त्तव्यम् ।[44]

**विप्राणां भवनाय गर्भविधानम्** - देवालयानन्तरं चतुर्णां वर्णानां भवनेभ्यः गर्भविधानाय ग्रन्थकारेणोक्तमस्ति यत् सर्वप्रथमन्तु विप्राणाम् आवासीयभवनाय स्वर्णनिर्मित्तकमण्डलुदण्डकाष्ठशुल्बैः गर्भविधानं कर्त्तव्यम् । मतान्तरेण दण्डकाष्ठस्थाने दन्तकाष्ठमिति पाठः लभ्यते। एवमेव यज्ञोपवीत-यज्ञकुण्ड-यज्ञपात्रादीनां निर्माणं रजतधातुना कारयेत् ।[45]

उक्तेषु मध्ये यज्ञोपवीतं, दक्षिणभागे यज्ञपात्रं, वामभागे कलशं, समक्षञ्च अग्निकुण्डं स्थापयेत् । चतुर्दिक्षु स्वस्तिकचिह्नानि स्युः इति ब्राह्मणवर्गस्य भवनाय गर्भविधानं कर्त्तव्यम् ।[46]

**क्षत्रियवर्गस्य आवासीयभवनाय गर्भविधानम्** - क्षत्रियभवनाय गर्भविन्यासार्थं मध्ये स्वर्णमयचक्रं वामभागे च रजतमयं शङ्खं स्थापयेत्। वामभाग एव ताम्रनिर्मित्तकार्मुकं स्थापयेत्। दक्षिणभागे स्वर्णनिर्मित्तदण्डं लौहधातुनिर्मित्तं खड्गञ्च स्थापयेत्। पूर्वादिक्रमानुसारेण स्वर्ण-लौह-ताम्र-रजतधातुभिर्निर्मितान् गजान् स्थापयेत्।[47] यदि शासनकर्त्तुः नरेशस्य भवनमस्ति चेत् तदा तन्मध्ये स्वर्णमयी-लक्ष्म्याः प्रतिकृतिं (श्रीरूपम्) स्थापयेत्। तत्रैव च चतुर्दिक्षु स्वसस्तिक-छत्र-ध्वज-पताका-दण्डादिभिर्गर्भविधानं कर्त्तव्यम् ।[48]

क्षत्रियाणां भवनप्रसङ्गे ज्ञातव्यमस्ति यत् तत्र गर्भविधानं राजद्वारे अथवा उचितस्थले एव कर्त्तव्यम्। अस्मिन्नेव क्रमे

विचारणीयमस्ति यत् वार्ष्णेयेभ्यः गर्भविधानं विजयद्वारस्य दक्षिणभागे कर्त्तव्यम् ।[49]

**वैश्यानामावासीयभवनाय गर्भविधानम्** - वैश्यवर्णस्य भवनाय गर्भविधाने पञ्च वैष्णवाऽऽयुधानामुल्लेखो प्राप्यते। ते च सन्ति –
1. चक्रम् 2. शङ्खः 3. धनुः 4. दण्डः 5. नन्दनखड्गः चेति ।
एतैः पञ्चायुधैः सह लौहधातुनिर्मित्तहल–ताम्रनिर्मित्तकुलीर–शङ्खैः गर्भविधानं कर्त्तव्यम् । तत्रैव अश्व–वृष–सिंहादीनां क्रमशः अर्क–इन्दु–अग्नि–वरुणानां पदेषु न्यासं कुर्यात्। अर्थात् आदित्यस्य पदे अश्वस्य, अग्निपदे गजस्य, वरुणपदे वृषस्य, इन्दुपदे च सिंहस्य न्यासः कर्त्तव्यः ।[50]

एतदतिरिक्तं ताम्रपात्रे चतुर्दिक्षु श्वेतरजतनिर्मितानां चतुर्गवानां न्यासं कुर्यात् । अग्रे च रजतनिर्मित वृषभस्य निवेशं कुर्यात्।

**शूद्राणामावसीयभवनाय गर्भविधानम्** - मयमतशास्त्रानुसारं शूद्राणामावासीयभवनाय गर्भविधाने सर्वप्रथमन्तु स्वर्णमयं बीजपात्रं हलंञ्च, ताम्रमयं युगं ,रजतमयं च पशुः पूर्वादिक्रमेण चतुर्दिक्षु स्थापयेत् ।[51] मध्ये वृषभस्य निवेशं कुर्यात् यः युगस्य निरीक्षणं कुर्वन्नस्ति। हलं दक्षिणभागे बीजपात्रञ्च वामांशे स्थापयेत्, यस्मिन् हिरण्यमयानि बीजानि स्युः। एवं गर्भविन्यासः शूद्रवर्णसम्मतो वर्तते ।[52]

**चतुश्शाले गर्भविन्यासस्थानम्** - चतुर्गृहयुक्ताय भवनाय (चतुश्शालार्थं) पुष्पदन्त–भल्लाटक–महेन्द्र–गृहक्षतादीनां पदे न्यासं जानीयात्, परञ्चात्र उत्तरदिगादिक्रमेण दक्षिणे नेत्रभित्तिमध्ये निर्दिष्टं स्थानं जानीयात् ।[53]

**धान्यालयाय गर्भविधानम्** - यद् भवनं (अन्नभाण्डागारः) दक्षिणदिशि स्यात्, तदर्थं कलशे ओदनं स्थापयेत्। यदि धान्यालयस्य गर्भविधानं करणीयमस्ति चेत् तदर्थं तले अर्गलां कुञ्चजकाञ्च स्थापयेत् ।[54]

**सभादिभ्यः गर्भविन्यासस्थानम्** - यदि सभा–जलस्थान–यज्ञमण्डपादीनां निर्माणं करणीयमस्ति चेत् तत्र गर्भविन्यासः प्रदक्षिणक्रमेण दक्षिणकर्णपादे कर्त्तव्यम्। अत्र द्वितीयस्तम्भे दक्षिणद्वारस्य स्तम्भेऽपि न्यासं कर्त्तुं शक्यते ।[55] तत्र पात्रमध्ये लौहमयहस्तिः कृष्णलौहमयकोद्रवधान्यं तथा च स्वर्णनिर्मित्तलक्ष्मी–सरस्वतीदेव्योः प्रतिमां स्थापयेत् ।[56]

**नाट्यसभागाराय गर्भविधानम्** - नगरादिस्थानेषु अनुरञ्जनार्थं निर्मितायै रङ्गशालायै ज्ञातव्यमस्ति यत् नाट्यगारस्य मुख्यद्वारे (कुटिकामुखे) अथवा तत्र निर्मित्तस्य मण्डितस्तम्भस्य मूले अथव द्वयोः स्थानयोर्गर्भविधानं कर्त्तुं शक्यते । नाट्यशालायै तत्र सर्वधातुमयसमस्तावश्यकवाद्योपकरणैर्गर्भविधानं कर्त्तव्यम् ।[57]

**तुलाभार-अभिषेकाभ्यां मण्डपगर्भविन्यासः** - गृहस्य स्तम्भेषु तुलाभारादीनां कार्यं महत्त्वपूर्णं मत्त्वा तत्रापि गर्भविधानमावश्यकमस्ति । तदर्थं ग्रन्थकारो वदति यत् श्रीवत्स–पद्म–पूर्णकुम्भानां रचना स्वर्णधातुना कारयेत् । हेमगर्भ–सभागर्भ–द्वारस्तम्भेभ्यः पूर्वोक्तप्रदक्षिणकर्णपादानुसारं गर्भविधानं कर्त्तव्यम् । अस्य वर्णनस्य प्रयोजनन्तु तुलाभाराऽभिषेकमण्डपाभ्यां ज्ञातव्यम् ।[58]

**सन्दर्भ–**


1. तैतिलानां द्विजातीनां वर्णानां हर्म्यके गृहे ।
गर्भन्यासविधः सम्यक् सङ्क्षेपाद् वक्ष्यतेऽधुना ॥ मयमुनिः, मयमतम्, 12.1

2. सर्वद्रव्यैस्तु सम्पन्नं गर्भं तत् सम्पदां पदम् ।
द्रव्यहीनमसम्पम्मं गर्भं सर्वविपत्करम् ॥ मयमुनिः, मयमतम्, 12.2
तस्मात् सर्वप्रयत्नेन गर्भं सम्यग् विनिक्षिपेत् ।

3.वामनशिवराम आप्टे, संस्कृत–हिन्दीशब्दकोशः, पृष्ठसङ्ख्या – 371–372

4.निम्नगाह्रदसस्याद्रिपल्लिके कुलिरावटे ।

हलस्थलाब्धिगोशृङ्गहस्तिदन्तेषु मृतिका ॥ मयमतम्, 12.5
5. चक्रपाणिमिश्रः, राज्याभिषेकपद्धतिः, विष्णुधर्मोत्तरीयनिर्देशः, 15-17
6.मानसारः, 12.11-17
7.मयमतम् 12.9
8.गृहीतोच्चत्रि भागैकं पादालम्बिविधानकम् ॥ मयमतम्, 12.11
तत्तद्धर्म्याङ्घ्रिविष्कम्भसमं वाष्टांश हीनकम् ।
त्रिपादं वा विशालं तत् फेलायाः प्रागिवोच्छ्रयम् ॥ मयमतम्, 12.12
9.त्रिवर्गमण्डलपाकारं वृत्त वा चतुरश्रकम् ।
पञ्चविंशतिकोष्ठं वा नव कोष्ठकमेव वा ॥ मयमतम्, 12.13
10.मयमतम् 12.15
11. स्थण्डिले चण्डितं कृत्वा मण्डुकं वाऽथ तत्परम् ।
विन्यस्य देवान् ब्रह्मादीन् श्वेततण्डुलधारया ॥ मयमतम्, 12.17
12. आराध्य गन्धपुष्पाद्यैर्भुवनाधिपतिं जपेत् ।
स्थपतिः कलशान् न्यस्य सर्वान् वस्त्रविभूषितान् ॥मयमतम्, 12.18
13. सुगन्धोदकसम्पूर्णान् गन्धपुष्पसमर्चितान् ।
निष्कलङ्कानसुषिरान् पञ्चपञ्चैव सूत्रितान् ॥ मयमतम्, 12.19
14.तस्य प्रदक्षिणे गन्धशालिस्थण्डिल मण्डले ।
आराध्य गन्धपुष्पाद्यैर्बलिं दत्त्वा यथाविधि ॥ मयमतम्, 12.20
15. हेमराजतशुल्बैश्च शालिव्रीहिकुलत्थकान् ॥ मयमतम्, 12.23
त्रपुणा कङ्कु सीसेन माषो मुद्गोऽयसायसा ।
कोद्रवं च तिलं भाव्यं वैकृन्तेन प्रयत्नतः ॥ मयमतम्, 12.24
ईशादिषु न्यसेदेतान्यष्टदिक्षु यथाक्रमम् ।
16. जयन्ते जातिहिङ्गुल्यं हरितालं भृशे मतम् ॥ मयमतम्, 12.25
मनः शिला च वितथे भृङ्गराजे तु माक्षिकम् ।
राजावर्त्तं तु सुग्रीवे शोषे गौरिकमीरितम् ॥ मयमतम्, 12.26
अञ्जनं गणमुख्ये स्यादुदितौ दरदं विदुः ।
17. मध्ये पद्मरागं तु मरीचौ विद्रुम मतम् ॥ मयमतम्, 12.27
सविन्द्रे पुष्यरागं तुं वैडूर्यं स्याद् विवस्वति ।
वज्रमिन्द्रजये विद्यादिन्द्रनीलं तु मित्रके ॥ मयमतम्, 12.28
रुद्राजे महानीलं मरकतं तु महीधरे ।
मुक्तापवत्से मध्यादिपूर्वेण क्रमशो न्यसेत् ॥ मयमुनिः, मयमतम्, 12.29
18. विष्णुक्रान्ता त्रिशूला श्रीः सहा दूर्वा च भृङ्गकम् ।
अपामार्गैकपत्राब्जमीशादिष्वौषधं न्यसेत् ॥ मयमुनिः, मयमतम्, 12. 30
19. चन्दनागरुकर्पूरलवङ्गैलालताफलम् ।
तक्कोलेनाष्टगन्धांस्तु जयन्तादिषु विन्यसेत् ॥ मयमतम्, 12.31
20.कार्तस्वरमयं चाष्टमङ्गलमं तत्र पूर्ववत् ।

दर्पणं पूर्णकुम्भं च वृषभं युग्मचामरम् ॥ मयमतम्, 12.34
श्रीवत्सं स्वस्तिकं शङ्खं दीपं देवाष्टमङ्गलम् ।
स्थापकस्यानुशिष्यस्तान् स्थपति: क्रमशो न्यसेत् ॥ मयमतम्, 12.35

21. आच्छाद्य भाजनं शुभ्रं पिधानेन तु निश्चलम् ।
तमेवाराध्य गन्धाद्यै: स्नापयेत् कलशोदकै: ॥ मयमतम्, 12.36

22. विप्रस्वाध्यायषैश्च शङ्खभेर्यादिनि: स्वनै: ।
कल्याणजयघोषैश्च स्थपति: स्थापकेन तु ।। मयमतम्, 12.37
पुष्पकुण्डलहारादिकटकैरङ्गुलीयकै: ।
पञ्चाङ्गभूषणैर्हेमनिर्मितैश्च विभूषणै: ॥ मयमतम्, 12.38
हेमयज्ञोपवीतस्तु नववस्त्रोत्तरीयक: ।
श्वेतानुलेपनश्चैव सितपुष्पशिरा: शुचि: ॥ मयमतम्, 12.39

23. ध्यात्वा धरातलं सर्वं दिग्गिन्द्रपेन्द्रसमन्वितम् ।
ससागरं सशैलेन्द्रमनन्तस्योपरि स्थिरम् ॥ मयमतम्, 12.40
सृष्टिस्थितिलयाधारं भुवनाधिपतिं जपेत् ।

24. ब्रह्मादीनां च देवानां द्वारदक्षिणे ॥ मयमतम्, 12.41
स्तम्भमूले यथायोग गर्ते गर्भं निधापयेत् ।

25. होमस्तम्भे प्रतिस्तम्भे पादुकाच्च प्रतेरध: ॥ मयमतम्, 12.42
तस्मादत्युन्नतं निम्नं गर्भं सम्पद्विनाशकृत् ।

26. चतुरश्रीकृता सारवृक्षपाषाणनिर्मिता ॥ मयमतम्, 12.43
पात्रद्विगुणविस्तारा पञ्चाङ्गुल घनान्विता ।
प्रतिमाफलका या सा स्थाप्या तद्भाजनोपरि ॥ मयमतम्, 12.44

27. तदूर्ध्वे स्थापयेत् स्तम्भं संश्लिष्टचतुरिष्टकम् ।
सरत्नौषधिभिर्युक्तं वस्त्र पुष्पादिशोभितम्॥ मयमतम्, 12.45

28. विष्णुधिष्णे च गर्भं स्याद्धैमं चक्रं तु मध्यमे ॥ मयमतम्, 12.46
शङ्खकार्मुक दण्डं च रुक्ममायसनन्दकम् ।

29. धनु: शङ्खं च वामे तु खड्ग दण्डं च दक्षिणे ॥ मयमतम्, 12.47
प्रमुखे वैनतेयं च स्थापयेद्धेमनिर्मितम् ।

30. यज्ञोपवीतमोङ्कारं स्वस्तिकाग्निं च हेमजम् ॥ मयमतम्, 12.48
पद्मं कमण्डलुं चाक्षसूत्रदर्भाश्च ताम्रजा: ।
ब्रह्मासनपदे मध्येऽग्नबुरुहं स्थाप्यमेव च ॥ मयमतम्, 12.49

31. तस्मान्मध्ये तदोङ्कारं यज्ञसूत्रावृतं तु यत् ।
स्वस्तिकानि चतुर्दिक्षु वामे स्थाप्यं कमण्डलु ॥ मयमतम्, 12.50
कुशाक्षमालं वामे तु पुरे तीक्ष्णानलं क्षिपेत् ।
ब्रह्मगर्भमिदं प्रोक्तं ब्रह्मस्थाने प्रतिष्ठितम् ॥ मयमतम्, 12.51

32.स्वस्तिकं चाक्षमालां च शक्तिं चक्रं च कुक्कुटम् ।
मयूरं चैव सौवर्णमयसा शक्तिमध्यमे ॥ मयमतम्, 12.52

33. अम्बुजं चाङ्कुशं पाशं सिंहं सवितृधामके ।
वज्रेभं नन्दकं चक्रं चामरे धाम्नि वज्रिण: ॥ मयमतम्, 12.54
34. जाम्बूनदमयं मेषं शक्तिं पावकधामनि ।
अयसा महिषं पाशं हेमजं यमधामनि ॥ मयमतम्, 12.55
35. अयसा नन्दकं गर्भं निर्ऋतेस्तु विमानके ।
वरुणे मकरं पाशं लोहजं हेमजं तथा ॥ मयमतम्, 12.56
36. वायो: कृष्णमृगं हैमं व्यालं तारापते: क्षिपेत् ।
नरवाहे नर: प्रोक्तो मकरो मदनालये ॥ मयमतम्, 12.57
37.टङ्कं दन्ताक्षमाला च विघ्नेशावासगर्भके ।
ओङ्कारं वक्रदण्डं च सौवर्णं चार्यास्य तु ॥मयमतम्, 12.58
38. अश्वथं करकं सिहं छत्रं स्वर्णेन कारयेत् ।
अश्वथं पुरत: स्थाप्यश्छत्रं तस्योपरि स्थितम् ॥
कुण्डिकापरभागे तु केसरी दक्षिणे भवेत् ।
सौगते धामके गर्भं श्रीवत्साशोकसिंहकम् ॥ मयमतम्, 12.59– 60
कमण्डल्वक्षमाला च शिखिपिञ्छं तु हेमजम् ।
त्रिच्छत्रं करकं तालवृन्तं रुक्ममयं भवेत् ॥ मयमतम्, 12.61
39. वृक्षस्तु पुरत: स्थाप्यश्छत्रं तस्योपरि स्थितम् ।
पिञ्छं दक्षिणभागेऽक्षमाला वामे तु कुण्डिका ॥ मयमतम्, 12.62
श्रीरूपं मध्यमे स्थाप्यं केसरीं तत्र विन्यसेत् ।
अपरे करकं तालवृन्तं गर्भौ जिनालये ॥ मयमतम्, 12.63
40. शुकं चक्रं च हैमं तु सिंहं शङ्खं च राजतम् ।
मृगं ताम्रमयं चैव कृष्णलोहेन नन्दकम् ॥ मयमतम्, 12.64
एवं दुर्गाविमाने तु गर्भं कुर्याद् विचक्षण: ।
41. खट्वाङ्गनन्दकं शक्तिं क्षेत्रपालस्य हेमजम् ॥ मयमतम्, 12.65
42. पद्मं लक्ष्म्या: सरस्वत्या ओङ्कारं च त्रिवर्णकम् ।
ध्वाङ्क्षकेतूत्पलं हैमं ज्येष्ठाकोष्ठस्य गर्भके ॥ मयमतम्, 12.66
43.कपालशूलघण्टाभि: प्रेतान् कालीगृहे न्यसेत् ।
हंसोक्षशिखिताक्ष्यांश्च सिंहेभप्रेरूपकान् ॥ मयमतम्, 12.67
जाम्बूनदमयान् मातृकोष्ठकेषु निधापयेत् ।
44. चित्रध्वजपताकाश्च सचिह्नै: सह वाहनै: ।
अनुक्तानां च देवानां देवीनां गर्भमिष्यते ॥ मयमतम्, 12.70
45. द्विजातीनां तु वर्णानां जातिगर्भो विधीयते ।
करकं दण्डकाष्ठं च शुल्बं हेममयं भवेत् ॥ मयमुनि: 12.71
यज्ञोपवीतं यज्ञाग्निं यज्ञभाण्डं च राजतम् ।
46.यज्ञोपवीतमध्यस्थं यज्ञभाण्डं च दक्षिणे ॥ मयमतम्, 12.72
वामे तु करकं काष्ठमनलं पुरतो भवेत् ।

विप्रगर्भमिदं प्रोक्तं स्वस्तिकानि चतुर्दिशि ॥ मयमतम्, 12.73
47. मध्ये हेममयं चक्रं वामे शङ्खं च राजतम् ।
कार्मुकं ताम्रजं वामे दण्डो रुक्मेण दक्षिणे ॥ मयमतम्, 12.74
खड्गं चायसमेव स्याच्चतुर्नागाश्चतुर्दिशि ।
हैममायसकं ताम्रं राजतं क्रमशो न्यसेत् ॥ मयमतम्, 12.75
48. मध्ये श्रीरुपकं हैमं स्वस्तिकानि चतुर्दिशि ।
छत्रध्वजपताकाश्च दण्डं वै शासनात्मकम् ॥ मयमतम्, 12.76
49. राजद्वारे भवेद् गर्भमन्येषां तु यथार्हकम् ।
वार्ष्णेयकानां गर्भं चेद् विजयद्वारदक्षिणे ॥ मयमतम्, 12.77
50.अयसा हलजिह्वां च शङ्खं ताम्रकुलीरकम् ।
पञ्चायुधं सीसमाषं वृषगजौ हरिम् ॥ मयमतम्, 12.78
अर्काग्निवरुणेन्दूनां स्थाने सम्यङ्निवेशयेत् ।
51. बीजपात्रं हलं हैमं ताम्रजं युगामिष्यते ॥ मयमतम्, 12.80
रजतेन पशु विद्याच्चतुर्दिक्षु विनिक्षिपेत् ।
52. मध्ये गोपुङ्गवं चैव तन्निरीक्ष्य युगं पुनः ॥ मयमतम्, 12.81
हलं दक्षिणभागे तु वामांशे बीजपात्रकम् ।
बीजं हिरण्यमयं शूद्रगर्भं वैश्ये च सम्मतम् ॥ मयमतम्, 12.82
53.पुष्पदन्ते च भल्लाटे महेन्द्रे च गृहक्षते ।
दक्षिणे नेत्रभित्तौ तु सौम्यादौ तु चतुर्गहे ॥ मयमतम्, 12.84
54. दक्षिणे भवने गर्भः कुम्भः शाल्युदपूरितः ॥ मयमतम्, 12.86
धनसद्मनि गर्भस्तु सार्गलं कुञ्चिकं भवेत् ।
55. सभाप्रपामण्डपेषु कर्णपादे प्रदक्षिणे ।
द्वितीयस्तम्भके द्वारदक्षिणाङ्घ्रौ तु वा न्यसेत् ॥ मयमतम्, 12.89
56. अयोमयगजो गर्भः कृष्णलोहेन कोद्रवः ।
लक्ष्मीं सरस्वतीं हेमां पात्रमध्ये तु विन्यसेत् ॥ मयमतम्, 12.90
57. गर्भो नाट्यसभायां च प्रक्षिपेत् कुटिकामुखे ।
मण्डितस्तम्भमूले वाऽप्युभयोरपि चेष्यते ॥ मयमतम, 12.91
अतोद्यानि च सर्वाणि सर्वलोहमयानि च ।
58.श्रीवत्सं पङ्कजं पूर्णकुम्भं हेमजमिष्यते ॥ मयमतम्, 12.92
हेमगर्भसभागर्भो द्वारस्तम्भे विधीयते ।
पूर्वोक्तकर्णपादे वा गर्भस्थानं तु तस्य वै ॥मयमतम्, 12.93
तुलाभाराभिषेकार्थं मण्डपे वाऽथ तद्भवेत् ।